Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ चित्तविद्यामन्त्रः —

संवर्तक ऋषिः। शक्वरी छन्दः। चित्तविद्या देवता। ठं बीजम्। [1] छ्रूं शक्तिः। इष्टसिद्ध्यर्थे०। बीजशक्तिभ्यां करन्यासः। मन्त्रपादैः षडङ्गानि ॥

अमलकमलमध्ये चन्द्रपीठे निषण्णा-
मम्रृतकलशदानाभीतिमुद्राग्रहस्ताम्।
प्रणतशिरसि पूरं संस्रवन्ती सुधायाः
शरणमहमुपैमि श्रीशिवां चित्तविद्याम् ॥

[2] वं सं झ्रं झं युं जुं ठं ह्रीं श्रीं ओं भगवति चित्रविद्ये महामाये अमृतेश्वरि एह्येहि [3] वरदे वरदे प्रसन्नवदने अमृतं प्लावय प्लावय अनलं शीतलं कुरु कुरु सर्वविषं नाशय नाशय सर्वतापज्वरं हन हन सर्वपैत्योन्मादं मोचय मोचय आज्योष्णं शमय शमय सर्वजनं मोहय मोहय मां पालय पालय श्रीं ह्रीं ठं जुं झं झ्रं सं वं स्वाहा ॥

अयुतं सहस्रं वा जपेत् ॥

वृत्तमालिख्य तन्मध्ये बीजषट्कं लिखेत्ततः।

---

१. झ्रं इति ख, ग, घ, ङ मातृकापाठः।

२. वं सं झ्रं झं जुं ठं इति ख ङ मातृकापाठः।

३. वरे वरदे इति ख-ङ मातृकापाठः।

मायया[1] च श्रियावेष्ट्य मनसा साध्यमूर्धनि ॥

तत्सुधासेचितं ध्यात्वा देशिकं मूर्ध्नि चिन्तयन् ।
विशेत् स्पृशेत् हरेत् सेचेत् चिन्त्यविद्यामनुस्मरन् ॥

कारयेद्वाऽखिलं चान्यैः पैत्योन्मादे तु सुन्दरि ।
वृत्तद्वयं समालिख्य बहिश्शूलाष्टकं लिखेत् ॥

वृत्तमध्येऽष्टबीजं च मन्त्रं तस्यान्तरालके ।
शूलाग्रे विलिखेत्साध्यमष्टबीजद्वयं तथा ॥

स्पृशन्मन्त्री द्विधा जप्त्वा वाहनाद्युपचारकान् ।
कृत्वा तच्छतवारं तु मन्त्री मन्त्रितविद्यया ॥

तत्पत्रं गुळमध्यस्थं खादयित्वा प्रवेशयेत् ।
पुष्पवत्सुधरेज्जन्तुं प्रविष्टं हव्यवाहनः ॥

अष्टबीजद्वयं प्रतिलोमानुलोमितम् ।
अष्टबीजानि तु मन्त्रादावुक्तानि ॥